Roll No. : ......................................

Total No. of Questions : **12** ]                                        [ Total No. of Printed Pages : **3**

# APF–2034

## M.A. (Final) Examination, 2022

## SANSKRIT

Paper - VII (A)

## (वर्ग 'अ' साहित्य तथा संस्कृत काव्यशास्त्र)

*Time : 3 Hours* ]                                        [ *Maximum Marks : 100*

**खण्ड–अ**                **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब**                **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स**                **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. सर्वेऽपि **दश** प्रश्नाः समाधेयाः। एतेषु यथेच्छं किमपि प्रश्नद्वयं संस्कृतेन समाधेयम्।

   (i) काव्यप्रकाशस्य मङ्गलाचरण-कारिका शुद्धया गिरा लिख्यताम्।

   (ii) मम्मटोक्तं काव्यदोषलक्षणं किमस्ति ?

(iii) काव्यप्रकाशस्य कस्मिन् उल्लासे गुणालंकार-निरूपणम् अस्ति ?

(iv) स्थायिभावानां नामानि लिख्यन्ताम्।

(v) शृङ्गाररसस्य कौ द्वौ भेदौ स्तः ?

(vi) लक्षणावृत्तेः किं लक्षणं मम्मटेन प्रोक्तम् ? मूलकारिकां लिखत।

(vii) ध्वन्यालोकस्य कर्त्ता कः ? तत्र लोचन-टीका केन कृता ?

(viii) आलोककारः काव्यस्य आत्मानं कं मनुते ?

(ix) रीति-सम्प्रदायस्य प्रवर्तकः कोऽस्ति ?

(x) काव्यशास्त्रस्य आद्यः (प्रथमः) ग्रन्थः कः विद्यते। कश्च तस्य कर्त्ता वर्तते ?

**खण्ड–ब**

**नोट** :– अधोलिखितेषु केषाञ्चन **पञ्चानां** हि प्रश्नानाम् उत्तरं लेख्यम्, किन्त्वत्र अन्तिमः प्रश्नः अनिवार्यतया समाधेयः।

2. सप्रसङ्गं व्याख्या कार्या–

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।

सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥

3. 'तात्पर्यार्थोऽपि केषुचित्' इति सूत्रस्य व्याख्या कार्या।

4. 'व्यङ्ग्यमेवं गुणीभूतव्यंग्यस्याष्टौ भिदाः स्मृताः'

इत्यनुसारेण गुणीभूतव्यंग्यस्य भेदाः प्रतिपादनीयाः।

5. अधस्तन कारिका सप्रसङ्गं व्याख्येया–

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।

यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥

6. वक्रोक्तिजीवितम् **अथवा** काव्यप्रकाशः इत्यधिकृत्य टिप्पणी लिख्यताम्।

7. 'सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते' इत्यस्याः पंक्तेराशयः स्पष्टीकरणीयः सोदाहरणम्।

8. अधोलिखितस्य संस्कृतेन सप्रसङ्गं व्याख्या कार्या–

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।

उत्कर्षहेतवस्तेष्युरचलस्थितयो गुणाः॥

**अथवा**

न दोषः स्वपदेनोक्तावपि सञ्चारिणः क्वचित्।

## खण्ड–स

**नोट** :– अधोलिखितेषु कयोश्चिद् **द्वयोः** प्रश्नयोः उत्तरं देयम्–

9. रससूत्रस्य व्याख्या सविस्तरं क्रियताम्।

10. 'रसदोषाणाम् अपवादाः' इति विषयम् स्वीकृत्य निबन्धः लेखनीयः।

11. अलङ्कार–सम्प्रदायस्य विस्तृत–परिचयः देयः।

12. आचार्य मम्मटस्य काव्यलक्षणस्य समीक्षा क्रियताम्।